# Shri Sharada Varnamala StavaH

# श्रीशारदावर्णमालास्तवः

## Document Information

Text title : shAradAvarNamAlAstavaH

File name : shAradAvarNamAlAstavaH.itx

Category : devii, sarasvatI, aShTaka, chandrashekharabhAratI, devI, stava

Location : doc_devii

Author : Sri Chandrashekhara Bharati

Proofread by : NA

Latest update : January 10, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# श्रीशारदावर्णमालास्तवः

श्रीशिवापूज्यपादाब्जा श्रीकन्धरसहोदरी ।
श्रीधुतस्फटिका भूयात् श्रियै मे शारदाऽनिशम् ॥ १॥

शारदाभ्रसदृग्वस्त्रां नीलनीरदकुन्तलाम् ।
पारदां दुःखवाराशेः शारदां सततं भजे ॥ २॥

रत्नचित्रितभूषाढ्यां प्रत्नवाक्स्तुतवैभवाम् ।
नूत्नसारस्यदां वाणीं कृत्स्नज्ञानाप्तये स्तुमः ॥ ३॥

दाडिमीबीजरदनां दान्त्यादिगुणदायिनीम् ।
दानधिक्कृतकल्पद्रुं दासोऽहं नौमि शारदाम् ॥ ४॥

यैः सदा पूजिता ध्याता यैषा शृङ्गपुरस्थिता ॥

शारदाम्बा लोकपूज्यास्त एव हि नरोत्तमाः ॥ ५॥

नमत्सुरीकैश्यगन्धलुब्धभ्रमरराजितम् ।
नतेष्टदानसुरभिं वाणीपादाम्बुजं स्तुमः ॥ ६॥

मस्तराजचन्द्रलेखा पुस्तशोभिकराम्बुजा ॥

त्रस्तैणनयना वाणी ध्वस्ताघं मां तनोत्वरम् ॥ ७॥

शारदापादसरसीरुहसंसक्तचेतसाम् ।
यतिनां रचितं स्तोत्रं पठतां शिवदायकम् ॥ ८॥

इति श्रीचन्द्रशेकरभारती विरचितं श्रीशारदावर्णमालास्तवः सम्पूर्णः ।

Please send corrections to *sanskrit@cheerful.com*